श्री मातंगी स्तोत्रं 2

श्री मातंगी स्तोत्रं

मातंगीं मधुपानमत्तनयनां मातंग संचारिणीं
कुंभीकुंभविवृत्तपीवरकुचां कुंभादिपात्रांचितां |
ध्यायेऽहं मधुमारणैकसहजां ध्यातुः सुपुत्रप्रदां
शर्वाणीं सुरसिद्धसाध्यवनिता संसेविता पादुकां || 1 ||

मातंगी महिषादिराक्षसकृतध्वांतैकदीपो मणिः
मन्वादिस्तुत मंत्रराजविलसत्सद्भक्त चिंतामणिः |
श्रीमत्कौलिकदानहास्यरचना चातुर्य राकामणिः
देवि त्वं हृदये वसाद्यमहिमे मद्भाग्य रक्षामणिः || 2 ||

जय देवि विशालाक्षि जय सर्वेश्वरि जय |
जयांजनगिरिप्रख्ये महादेव प्रियंकरि || 3 ||

महाविश्वेशदयिते जय ब्रह्मादि पूजिते |
पुष्पांजलिं प्रदास्यामि गृहाण कुलनायिके || 4 ||

जय मातर्महाकृष्णे जय नीलोत्पलप्रभे |
मनोहारि नमस्तेऽस्तु नमस्तुभ्यं वशंकरि || 5 ||

जय सौभाग्यदे नृणां लोकमोहिनि ते नमः |
सर्वैश्वर्यप्रदे पुंसां सर्वविद्याप्रदे नमः || 6 ||

सर्वापदां नाशकरीं सर्वदारिद्र्यनाशिनीं |
नमो मातंगतनये नमश्चांडालि कामदे || 7 ||

नीलांबरे नमस्तुभ्यं नीलालकसमन्विते |
नमस्तुभ्यं महावाणि महालक्ष्मि नमोऽस्तु ते || 8 ||

महामातंगि पादाब्जं तव नित्यं नमाम्यहं |
एतदुक्तं महादेव्या मातंग्याः स्तोत्रमुत्तमं || 9 ||

सर्वकामप्रदं नित्यं यः पठेन्मानवोत्तमः |
विमुक्तः सकलैः पापैः समग्रं पुण्यमश्नुते || 10 ||

राजानो दासतां यांति नार्यो दासीत्वमाप्नुयुः |
दासीभूतं जगत्सर्वं शीघ्रं तस्य भवेद्ध्रुवं || 11 ||

महाकवी भवेद्वाग्भिः साक्षाद्वागीश्वरो भवेत् |
अचलां श्रियमाप्नोति अणिमाद्यष्टकं लभेत् || 12 ||

लभेन्मनोरथान् सर्वान् त्रैलोक्ये नापि दुर्लभान् |
अंते शिवत्वमाप्नोति नात्र कार्या विचारणा || 13 ||

इति श्री मातंगी स्तोत्रं |